॥श्रीगणेशाय नमः॥ अथ रुद्रगर्गोक्तैकनक्षत्रजननशांतिविधिः॥ एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृ
पुत्रयोः॥ प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्चयः॥ भ्रात्रोः भ्रातृभगिन्योरित्यर्थः॥ पितृपुत्रयोः पि
त्रोर्नक्षत्रे पुत्रदुहित्रोर्यदि प्रसूतिरित्यर्थः॥ तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु॥ शुभर्क्षे शुभ
पत्रे १ वारे च चंद्रताराबलान्विते॥ रिष्टविष्टिविवर्जे तु मारभेदिवसे सुधीः॥ आचार्यं वरयेत्पूर्वं चतुरोथ द्वि
जोत्तमान्॥ पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत्॥ अग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः॥
तत्तद्दक्षोक्तमंत्रेण पूजयेत्कलशोपरि॥ नक्षत्रमंत्रा वसिष्ठप्रोक्ते कार्यो न परिशिष्टेउक्ताः॥ अत्र नप
क्षत्रं तद्देवतां च पूजयेत्॥ वक्ष्यमाणज्योतिर्निबंधवचनात्॥ रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वे
ष्टयेत्॥ स्वशाखोक्तेन मार्गेण कुर्यादग्निमुखं ततः॥ अनेनैव तु मंत्रेण जुहुतेदष्टोत्तरं शतं॥ तत्तद्द
क्षोक्तेनेत्यर्थः॥ प्रत्येकं समिदन्नाज्यैः प्रायश्चित्तांतमेव च॥ अभिषेकं ततः कुर्यादाचार्यः पितृपुत्र
योः॥ पितृपुत्रयोरित्यत्र पितृग्रहणमुपलक्षणं यन्नक्षत्रे जन्म तेन सह बालकस्याभिषेक इत्य
र्थः॥ वस्त्रालंकारगोदानैराचार्यं पूजयेत्तु नः॥ ऋत्विजां दक्षिणां माषपत्रयस्तु वर्णकं॥ देवताप्रति

दत्ता १

अहिर्बुध्नियायनमः। अहिर्बुध्नियंआवाहयामि।

॥अथक्रमेणनक्षत्रदेवतामंत्राः कथ्यंते॥ कृत्तिकादिक्रमेणैव॥ अग्निर्मूर्धा १ प्रजाप
तेनत्वदे० २ आप्यायस्व० ३ कद्रुद्राय० ४ अदितिर्द्यौर्नि० ५ बृहस्पतेअ० ६ आयंगौः पृ० न
७ उदीरताम० ८ भगएवभ० ९ उभेद्यावापृ० १० आकृष्णेनर० ११ उतस्यदेवः स० १२ आ
नोनियुद्भिः० १३ इंद्राग्नीअव० १४ मानोमित्रोव० १५ इंद्रंवोविश्वतः० १६ मोषुणः परा० १७
अप्सुमेसोमः० १८ ओमासश्चर्षणी० १९ इदंविष्णुर्वि० २० त्वमयाअन्नव० २१ इमंमेव
रुण० २२ उतनोहिर्बुध्न्यः शृणोतु० २३ उतनोहिर्बुध्न्योमयस्कः० २४ पूषागाअ
न्वेतुनः० २५ प्रातर्युजाविबोधय० २६ यमायसोमं० २७॥ आपस्त्वंबभ्रुत्युक्तं अग्नि
नः पातुकृत्तिकाइत्यादिअशेषावाक्यैर्वापूजाहोमश्चकार्यः॥

अहिर्बुध्नियायसांगायसपरिवारायसायुधायसशक्तिकायइमंसदी
पंमाषभक्तबलिंसमर्पयामि। अहिर्बुध्नियअमुंबलिंगृहाणममसह
कुटुंबस्यआयुःकर्ताक्षेमकर्ताशांतिकर्त्तापुष्टिकर्त्तातुष्टिकर्त्तानि
र्विघ्नकर्त्तावरदोभव।